# भारतीस्तवनम् अथवा सरस्वतीस्तोत्रम्

Bharatistavanam or Sarasvatistotram

sanskritdocuments.org

April 14, 2018

# Bharatistavanam or Sarasvatistotram

# भारतीस्तवनम् अथवा सरस्वतीस्तोत्रम्

## Sanskrit Document Information

Text title : bhAratIstavanam

File name : bhAratIstavanam.itx

Category : devii, jaina, sarasvatI

Location : doc_devii

Author : Janimegha

Transliterated by : DPD

Proofread by : DPD

Latest update : April 14, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 14, 2018

*sanskritdocuments.org*

# भारतीस्तवनम् अथवा सरस्वतीस्तोत्रम्

जानीमेघेन लिखितम्

श्री शारदायै नमः ।
अन्तः कुण्डलिनिप्रसुप्तभुजङ्गाकारस्फुरद्विग्रहां
शक्तिं कुण्डलिनीं विधाय मनसा हुङ्कारदण्डाहताम् ।
षट्चक्राणि विभिद्य सद्य मनसां प्रद्योतनद्योतनीं
लीनां ब्रह्मपदे शिवेन सहितामेकत्र लीनां स्तुमः ॥ १॥

कन्दात्कुण्डलिनि ! त्वदीयवपुषा निर्गत्य तन्तुत्विषा
किञ्चिच्चुम्बितमम्बुजं शतदलं तद्ब्रह्मरन्ध्राद्धः ।
यश्चन्द्रद्युति ! चिन्तयत्यविरतं भूयोऽत्र भूमण्डले
तन्मन्ये कविचक्रवर्त्तिपदवीच्छत्रचूछलाद्वल्गाति ॥ २॥

यस्त्वद्वक्त्रमृगाङ्कमण्डलमिलत्कान्तिप्रतानोच्छलत
चञ्चच्चन्द्रकचकचक्रचित्रितककुप्कन्याकुलं ध्यायति ।
वाणी वाणिविचित्रभङ्गुरपदप्रागल्भयश्रृङ्गारिणी
नृत्यत्युन्मदनर्त्तकीव सरसं त्वद्वत्ररङ्गाङ्गणे ॥ ३॥

देवि ! त्वत्पदचन्द्रकान्तकरकश्चयोतत्सुधानिर्झर-
स्नानानन्दतरङ्गितः पिबति यः पीयूषधारारसम् ।
तारालङ्कृतचन्द्रशुक्तिकुहरेणाकण्ठमुत्कण्ठितो
वक्त्रेणोद्गिरतीव ते पुनरसौ वाणीविलासच्छलात् ॥ ४॥

क्षुभ्यत्सीरसमुद्रनिर्गतमहाशेषाहिलोकात्फणा
पत्रोत्रिद्रसितारविन्दकुहरे ! चन्द्रस्फुरत्कर्णिके ! ।
देवि ! त्वां च निजं च पश्यति वपुर्यः कान्तिभिन्नान्तरं
ब्राह्मि ! ब्रह्मविदस्य वल्गति वचःप्रागल्भ्यदुग्धाम्बुधे ॥ ५॥

नाभीपाण्डुरपुण्डरीककुहरे हृत्पुण्डरीके गल-

त्पीयूषद्रक(व) वर्ष(र्षि) णि ! प्रविशतीं त्वां मात्रिक्षमालिनीम् ।
दृष्ट्वा भारति ! भारती प्रभवति प्रायेण पुंसो यया
निर्ग्रन्थोऽपि शतान्यपि ग्रथयति ग्रन्थायुतानां नरः । ६॥

त्वां मुक्तामयसर्वभूषणधरां श्वेताम्बराडम्बरां
गौरीं गौरिसुधां तरङ्गधवलामालोक्य हृत्पङ्कजे ।
वीणापुस्तकमौक्तिकाक्षवलय श्वेताब्जवल्गत्करां
न स्यात्कः शुचिवृत्तचक्ररचनाचातुर्यचिन्तामणिः ॥ ७॥

अश्येत्स्वां तनुमिन्दुमण्डलगतां त्वां चाभितो मण्डितां
यो ब्रह्माण्डकरण्डपिण्डितसुधाडिण्डीरपिण्डैरिव ।
सुस्वच्छोद्गतिगद्यपद्मलहरीलीलाविलासामृतैः
सानन्दास्तमुपाचरन्ति कवयश्चन्द्रं चकोरा इव ॥ ८॥

तद्वेदान्तशिरस्तदोङ्कृतिमुखं ज्योतिःकलालोचनं
तत्तद्वेदभुजं तु(त) दात्महृदयं तद्गद्यपद्यां हि च ।
यस्त्वद्वर्ष्म विभावयत्यविरतं वाग्देवि ! तद्वाङ्गमयं
शब्दब्रह्मणि निष्ठितः स परमब्रह्मैकतामश्नुते ॥ ९॥

वाग्बीजं स्मर बीजवेष्टितमतो ज्योतिःकलाभृद्बहि-
रष्टद्वादशषोडशद्विगुणितद्विष्टाब्जपत्रान्वितम् ।
तद्बीजाक्षरकादिवर्णरचितान्यग्रे दलस्यान्तरे
हंसः कूड(ट) युतं भवेदवितथं यन्त्र तु सारस्वतम् ॥ १०॥

ॐ ह्रीँ श्रीँ स(ह) ह्रीँ सबीजकलितां वाग्वादिनीदेवतां
गीर्वाणासुरपूजितामनुदिनं काश्मीरदेशे भवाम् ।
अश्रान्तं निजभक्तिशक्तिवशतो यो ध्यायति प्रस्फुटं
बुद्धिज्ञानविचारसारमहितः स्याद्देव्यसौ साम्प्रतम् ॥ ११॥

स्मृत्वा यन्त्रं सहस्रच्छदकमलमनुध्याय नाभीहृदोत्थं
चेतःस्निग्धोर्द्धनाल हृदि च विकचितां बाष्पनिर्यातना स्यात् ।
तन्मध्ये चोर्ध्वरूपामभयदवरदां पुस्तकाम्भोजपाणीं
वाग्देवीं तन्मुखाच्च स्वमुखमनुगतां चिन्तयेदक्षरालीम् ॥ १२॥

किमिह बहुविकल्पैश्चिन्तितैर्यस्य कण्ठे
लुठति विमलवृत्तस्थूलमुक्तावलीयम् ।
भवति भवति नाथे भव्यभाषाविशेषै-

र्मधुरमधुसमृद्धस्तस्य वाचां विशेषः १३॥

इति श्रीजानीमेघेन लिखितं श्रीभारतीस्तवनं सम्पूर्णम् ।

प्रशस्तिः
यदक्षरपरिभ्रष्टं स्वरव्यञ्जनवर्जितम् ।
तत्सर्वं क्षमत्त्वां देवि ! प्रसीद परमेश्वर ।

॥ जानीमेघेन लिखितम् - सुमतिधीरगणिपठनार्थम् ॥ श्री ॥

Encoded and proofread by DPD

*Bharatistavanam or Sarasvatistotram*
pdf was typeset on April 14, 2018

Please send corrections to *sanskrit@cheerful.com*